Volume VII, 2014 | J. K. TIMES A Multidisciplinary International Journal | ISSN: 2278 - 4047

# संस्कृतकाव्ये छन्दसः प्रासङ्गिकता

ड: राजेन्द्रप्रसाद दास

मर्मवाणी :

जगति स्वछन्दसा गच्छति मानवः, प्रवहति स्व-छन्दसा स्रोतस्विनी, चलति च स्व-छन्दसा विश्वनिखिलमिति सर्वैरवहितम् । अतः छन्दसः विचरणमाधिपत्यञ्च सर्वत्र इति वक्तुं शक्यते । काव्य-कवितापि च न छन्दोरहिता । छन्दः एवं अत्र आधार-स्वरूपा, क्रोडदेशे च यस्याः काव्य-कवितायाः आविर्भावः लक्ष्यते। वैदिकयुगात् आधुनिक- युगपर्य्यन्तं सर्व साहित्यमेव प्रमाणमस्य । यथा -

अग्निमीले पुरोहितं
यज्ञस्य देवमृत्विजम् ।
होतारं रत्नाधातमम् ।।

ऋग्वेद-संहितायाः प्रथममण्डलान्तर्गते अग्निसूक्ते दृश्यते गायत्री-छन्दसा निबद्धः मन्त्रोऽयम् ।
वैदिक-युगस्य इव आधुनिक-युगेऽपि रामकृष्णात्मक-साहित्ये लक्ष्यते - छन्दसः अबाधविचरणम् । यथा

स्थापकाय च धर्मस्य
सर्वधर्म-स्वरुपिने ।
अवतार-वरिष्ठाय
रामकृष्णाय ते नमः ।।

विश्लेषणात् ज्ञायते - अनुष्टुप-छन्दसा मण्डितोऽयमतीव मनोज्ञः बन्दनाश्लोकः ।
छन्दोविहीना मन्त्रात्मक-रचना श्लोकात्मक-रचना वेति अकल्पनीयेति । अतः काव्य-कवितायां छन्दसः भूमिका अपरिहार्य्येति वक्तुं शक्यते ।

**विषय-सूचक-मुख्य-शव्दावली :** कविः, काव्यम्, साहित्यम्, छन्दः, वैदिक-साहित्यम्, रामकृष्णात्मक-साहित्यम्, असीमात्, सीमा-जगति, अभिसारः नृत्यशैल्याम्, सङ्गीतक्षेत्रे, काव्य-कवितायाम्, रुपमाधुर्य्यम, श्रुतिमाधुर्य्यम्, वाग्-भङ्ग्या, परिमितिबोधः, गायत्री, अनुष्टुप, गृहसंसारे, काव्य-संसारे, गृहलक्ष्मी, काव्यालक्ष्मी, ऋषिणाम, वेदमन्त्राः, श्लोकाः, आकर्षणीया, अपरिहार्य्या चेति ।।

## भूमिका :

छन्दोवद्धं जगत् सर्व, छन्दोवद्धं च कवेर्काव्यम् । न किञ्चतस्ति छन्दोरहितं मनोज्ञमिति । किं तावत् छन्दः? गतिविशेषो भङ्गिविशेषो वा छन्द एवेति वक्तुं शक्यते । सृष्ट्या सहैव अस्याविर्भावो लक्ष्यते । तरङ्गात्तरङ्गं विरच्य कलतानेन मुखरिता नदी स्वभङ्ग्याभियाति सागराभिमुखम् । दण्डपलप्रहराणां तरङ्गमुत्तोल्य कालः प्रयाति स्वगत्या महाकालाभिमुखमेव च । अस्यां गत्यौ भङ्ग्यौ वा अस्त्येकमाकर्षणीयमनुरणनं ताल-लय-सुराणाम् । नूपुर-निक्वणवत्